उपशास्त्री-I खण्ड साहित्य तृतीय-पत्रम्
काव्यदीपिका

Saathi

Date ___/___/___

प्र०(1) मम्मटमतानुसारेण पर्यायः नामकः अलंकारस्य किं स्वरूपम् ?
उत्तरम् - पर्यायनामकमलंकारः — एकं क्रमेणानेकस्मिन् पर्यायो-
ऽन्यस्ततोऽन्यथा ।
यथा -
स्थिताः क्षणं पक्ष्मसु ताडिताधराः पयोधरोत्सेधनिपातचूर्णिताः
वलीषु तस्याः स्खलिताः प्रपेदिरे क्रमेण नाभिं प्रथमोदबिन्दवः ॥
प्र०(2) विभावनाऽलङ्कारस्य किं स्वरूपम् ?
उत्तरम् - विभावना विना हेतु कार्योत्पत्तिर्यदुच्यते । यथा -
अपमेघोदयं वर्षमदृष्टकुसुमं फलम् ।
अतर्कितोपपन्नं वो दर्शनं प्रतिभाति मे ॥
अत्र मेघोदयकुसुमरूपकारणयोरभावेऽपि वर्षफलरूप
कार्ययोरभिधानम् ।

Renu Devi
16/12/20
राधाउमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।

उपशास्त्री-प्रखण्ड साहित्य - तृतीय-पत्रम्

काव्यदीपिका

प्र०(1) - मम्मटमतानुसारेण काव्यप्रयोजनम् किं स्वरूपम् ?

उत्तरम् — काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥

'प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते' इति नियमात् यदर्थोऽयमारम्भः तत् काव्यं कस्मै प्रयोजनायेति जिज्ञासायां मम्मटोक्तमेव तत्प्रयोजनमाह स्वग्रन्थेऽपि काव्ये यशसे इति। काव्यं = रमणीयार्थप्रतिपादकपदकदम्बम् यशसे = कालिदासादीनामिव कीर्तिलाभाय (भवति) अर्थकृते = अर्थस्य कृते, श्रीहर्षद्वारा धावकादीनामिव धनप्राप्तये, व्यवहारविदे = व्यवहारस्य = लोकाचारस्य विदे = ज्ञानाय लोकव्यवहारज्ञानाय; शिवेतरक्षतये - शिवात् = कल्याणात् इतरद् = अन्यद् यदमङ्गलं तस्य क्षतये = निवारणाय, कविर्हि काव्येन तत्तद्देवताः प्रसाद्य रोगदुर्ग्रहाद्युपद्रवान् क्षमयितुं शक्नोति, यथा मयूरकविः सूर्यशतकेन काव्येन सूर्यं समाराध्य नैजं कुष्ठरोगमशमयत् । सद्यः = काव्यश्रवण-पठनसमनन्तरमेव परनिर्वृतये - परा = अत्युत्कृष्टा लोकोत्तरा ब्रह्मानन्दस्वादसहोदरा निर्वृतिः = आनन्दः, सुख तस्यै = परमप्रीतये कान्ता-सम्मिततया - कान्तया लावण्यादिना मनोहरया वनितया सम्मितं तुल्यं कान्तासम्मितं तस्य भावस्तत्ता तया कान्ता-सम्मिततया = प्रेयसीनिर्विकल्पतया, उपदेशयुजे - उपदेशस्य = कर्तव्याकर्तव्यनिर्देशस्य युजे = योजनाय हितवाक्यप्रदानाय।

Renu Devi
16/12/20
राधाउमाकान्त सं० महावि० सुखसेना,
पूर्णिया )

शास्त्री-II खण्ड साहित्य

उत्तरमेघः - सूक्तिव्याख्याभागः

Date __/__/__

प्रश्न(1) कान्तोदन्तः सुहृदुपगतः सङ्गमात्किञ्चिदूनः ।।

उत्तरम् - प्रस्तुतोऽइयं सूक्तिः महाकवि कालिदासप्रणीतस्य मेघदूतस्य खण्डकाव्यस्य उत्तरमेघस्यास्ति। अत्र यक्षः मेघं सम्बोधयति यत् त्वमलकायां मम गेहं गत्वा मत्प्रियामेवं संदिशेः- "हे सौभाग्यवति! प्रियविरहेण विषीदतः पथिकान् सत्वरं भवनं प्रति गमनाय यः सम्प्रेरयति तादृशं निजवल्लभ तुभ्यं संदेशदानार्थमागतं मेघं मामवगच्छ।" इत्येवं रूपेणोक्ते सति मत्प्रिया सावधाना भूत्वा त्वां सत्कृत्य मदीयं सन्देशमाकर्णयिष्यति। इति निर्देशं दृढयन्नाह यक्षः - हे मेघ! नारीणां कृते मित्रप्राप्तः प्रियतमसमाचारः प्रियजनसम्पर्कात् किञ्चिन्न्यूनो भवति। प्रियजनसमाचारं श्रुत्वा नार्यः प्रफुल्लान्तःकरणाः भवन्ति। इति सर्वतन्त्रसिद्धान्तः। ननु सन्देशमात्रश्रवणादस्याः को लाभः इत्याशङ्क्या-ऽर्थान्तरमुपन्यस्यन्नाह यक्षः -

हे सज्जन! प्रियतम समाचारः कान्तसंगमसमः प्रहर्षजनको भवतीति भावः।

Renu Devi
16/12/20

राधा उमाकान्त सं० महाविद्यालय सुखसेना, पूर्णिया।

शास्त्री-I खण्ड साहित्य -
अभिज्ञान शाकुन्तलम्
चतुर्थोऽङ्कः

Date __/__/__

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं न तनयाविश्लेषदुःखैर्नवैः॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदासप्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्यशास्त्रस्य चतुर्थोऽङ्कात् उद्धृतोऽस्ति। अस्मिन् श्लोके महर्षि कण्वः अद्य शकुन्तलां पतिगृहं प्रेषयिष्यन् तस्याः स्नेहातिशयात् वैक्लव्यमुपगतो महर्षि कण्वः तदीयप्रस्थानमनुसन्दधानो ब्रवीति -

व्याख्या - पतिगेहं गमिष्यन्त्याः शकुन्तलायाः स्नेहातिशयाद् विक्लवहृदयः कुलपतिः कण्वो निजमनसि विचारयति - अद्य शकुन्तला पतिगृहं गमिष्यतीत्यनुसन्धानमात्रेण तदीयविरहवेदनया जडीभूतं मे हृदयं चिन्तया व्याप्तोऽस्मि, मम स्वरश्च प्रवृत्तानां बाष्पाणां प्रवृत्त्या गद्गदो जातः, मम नेत्रं च समक्ष-विषयाग्रहणासमर्थमजायत। जन्मत आरभ्य तपस्तप्त्वा तपोवने निवसतो वीतरागस्यापि मम यदीदृगनिर्वचनीयं वैक्लव्यं तर्हि विषयासक्तस्य गृहस्थस्य आत्मजावियोगजन्यदुःखैर्जातस्य क्लेशस्य का कथा? अत्र व्यतिरेकानुप्रासार्थापत्ति काव्यलिङ्गालंकाराः शार्दूलविक्रीडितं च छन्दः।

Renu Devi
16/12/20
राधा उमाकान्त सं० महावि०
सुखसेना, पूर्णिया।

Page No. ____